# Devadanavadikritam Shiva Stotram

# देवदानवादिकृतं शिवस्तोत्रम्

## Document Information

Text title : Devadanavadikritam Shiva Stotram

File name : devadAnavAdikRRitaMshivastotram.itx

Category : shiva, matsyapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : matsyapurANa | adhyAya 250/28-40||

Latest update : September 27, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 27, 2024

*sanskritdocuments.org*

# देवदानवादिकृतं शिवस्तोत्रम्

देवदानवा ऊचुः ।
नमस्तुभ्यं विरूपाक्ष नमस्ते दिव्यचक्षुषे ।
नमः पिनाकहस्ताय वज्रहस्ताय धन्विने ॥ २८॥

नमस्त्रिशूलहस्ताय दण्डहस्ताय धूर्जटे ।
नमस्त्रैलोक्यनाथाय भूतग्रामशरीरिणे ॥ २९॥

नमः सुरारिहन्त्रे च सोमाग्न्यर्काग्र्यचक्षुषे ।
ब्रह्मणे चैव रुद्राय नमस्ते विष्णुरूपिणे ॥ ३०॥

ब्रह्मणे वेदरूपाय नमस्ते देवरूपिणे ।
साङ्ख्ययोगाय भूतानां नमस्ते शम्भवाय ते ॥ ३१॥

मन्मथाङ्गविनाशाय नमः कालक्षयङ्कर ।
रंहसे देवदेवाय नमस्ते वसुरेतसे ॥ ३२॥

एकवीराय सर्वाय नमः पिङ्गकपर्दिने ।
उमाभर्त्रे नमस्तुभ्यं यज्ञत्रिपुरघातिने ॥ ३३॥

शुद्धबोधप्रबुद्धाय मुक्तकैवल्यरूपिणे ।
लोकत्रयविधात्रे च वरुणेन्द्राग्निरूपिणे ॥ ३४॥

ऋग्यजुःसामवेदाय पुरुषायेश्वराय च ।
अग्र्याय चैव चोग्राय विप्राय श्रुतिचक्षुषे ॥ ३५॥

रजसे चैव सत्त्वाय तमसे तिमिरात्मने ।
अनित्यनित्यभावाय नमो नित्यचरात्मने ॥ ३६॥

व्यक्ताय चैवाव्यक्ताय व्यक्ताव्यक्ताय वै नमः ।
भक्तानामार्तिनाशाय प्रियनारायणाय च ॥ ३७॥

उमाप्रियाय शर्वाय नन्दिवक्त्राञ्चिताय च ।

ऋतुमन्वन्तकल्पाय पक्षमासदिनात्मने ॥ ३८॥

नानारूपाय मुण्डाय वरूथपृथुदण्डिने ।
नमः कपालहस्ताय दिग्वासाय शिखण्डिने ॥ ३९॥

धन्विने रथिने चैव यतये ब्रह्मचारिणे ।
इत्येवमादिचरितैः स्तुतं तुभ्यं नमो नमः ॥ ४०॥

इति मत्स्यपुराणे पञ्चाशदधिकद्विशततमाध्यायान्तर्गतं
देवदानवादिकृतं शिवस्तोत्रं समाप्तम् ।

मत्स्यपुराण । अध्याय २५०/२८-४०॥

matsyapurANa . adhyAya 250/28-40..

Proofread by PSA Easwaran

*Devadanavadikritam Shiva Stotram*

pdf was typeset on September 27, 2024

Please send corrections to *sanskrit@cheerful.com*